## अध्याय : ३ Chapter-3

सूत उवाच ।।[१]

एवं स्थानानि पुण्यानि यानियानीह वै भुवि ।।
नीरीक्षंस्तत्र तत्राहं नारदो वीरसत्तम् ।। १

विचरन्मेदिनीं सर्वा प्राप्ताऽह्माश्रमं भृगोः ।।
यत्र रेवानदी पुण्या सप्तकल्पस्मरा वरा[२] ।। २

महा पुण्या पवित्रा च सर्वतीर्थमयी शुभा ।।
पुनाति कीर्तनेनैव दर्शनेन विशेषतः ।। ३

तत्रावगाहनात्पार्थ मुच्यते जंतुरंहसा ।।
यथा सा[३] पिङ्गला नाडी देहमध्ये व्यवस्थिता[४] ।। ४

इयं ब्रह्मांड पिण्डस्य स्थाने तस्मिन्प्रकीर्तिता ।।
तत्रास्ते शुक्लतीर्थाख्यं रेवायां पाप नाशनम् ।। ५

यत्र वै स्नानमात्रेण ब्रह्महत्या प्रणश्यति ।।
तस्यापि सन्निधौ पार्थ रेवाया उत्तरे तटे ।। ६

नानावृक्षसमा कीर्णं लतागुल्मोपशोभितम् ।।
नाना पुष्पफलो पेतं कदलीखंडमंडितम् ।। ७

---

१ अ प्रतौ इत्ययं पाठ नास्ति ।

२ ब तन्ना

३ ब स्मि

४ अ प्रतौ "प्रवक्षति" इति स्यात् ।

अनेकश्वापदाकीर्णं विहगैरनुनादितम् ।।
सुगंधपुष्पशोभाढ्यं मयूररवनादितम् ।। ८

भ्रमरैः सर्वमुत्सृज्य निलीनं रावसंयुतम् ।।
यथा संसारमुत्सृत्य भक्तेन हरपादयोः ।। ९

कोकिला मधुरैः[1] स्वानैर्नादयंति तथा[2] मुनीन् ।।
यथा[3] कथामृतारव्यानैर्ब्राह्मणा भवभीरुकान् । १०

यत्र वृक्षा ह्लादयंति फलैः पुष्पैश्च पत्रकैः ।।
छायाभिरपि काष्ठैश्च लोकानिव हरव्रताः ।। ११

पुत्रपुत्रेति वासंति यत्र पुत्रप्रियाः खगाः ।।
यथा शिवप्रियाः शैवा नित्यंशिवशिवेति च ।। १२

एवंविधं मुनेस्तस्य भृगोराश्रम मंडलम् ।।
विप्रैस्त्रिविध संयुक्तैः सर्वतः समलंकृतम् ।। १३

ऋग्यजुः सामनिर्घोषैश पूरित दिगन्तरम् ।।
रुद्रभक्तेन धीरेण[4] यथैव भुवनत्रयम् ।। १४

---

१ अ मधुर
२ अ यथा
३ ब तथा
४ ब वीरेण

तत्राहं पार्थ[१] संप्राप्तो यत्रास्ते मुनिसत्तमः ।।
भृगुः परमधर्मात्मा तपसा द्योतित प्रभः[२] ।। १५

आगच्छंतं तुमां दृष्ट्वा दीनं च मुदितं तथा[३] ।।
अभ्युत्थानं कृतं[४] सर्वैर्विप्रैर्भृगु पुरोगमैः ।। १६

कृत्वा सुस्वागतं दत्त्वा अर्घमर्घं भृगुणा सह ।।
आसनेषू पविष्टास्ते मुनींद्राः ग्राहितामया[५] ।। १७

विश्रांतिं तु ततो ज्ञात्वा भृगुर्मामभ्युवाच ह ।।
क्व गंतव्यं मुनि श्रेष्ठ कस्मादिह समागतः ।। १८

आगमन कारणं सर्वं समाचक्ष्व परिस्फुटम् ।।
ततस्तं चिंतयाविष्टो भृगुं पार्थाहम ब्रुवम् ।। १९

श्रूयतामभिधास्यामि यदर्थमहमागतः ।।
मया पर्यटिता सर्वा समुद्रांता च मेदिनी ।। २०

द्विजानां भूमिदानार्थं मार्गमाणाः पदे पदे ।।
निर्दोषां च पवित्रां च तीर्थेष्वपि समान्विताम् ।। २१

---

१ अ. ब वीर । परन्तु मुद्रित पुस्तके "पार्थ" ।
२ ब प्रभाः ।।
३ अ. ब तदा
४ अ. ब कृतं
५ अ. ब सहितामया ।

रम्यां मनोरमां भूमिं न पश्यामि कथंचन ।।
भृगुरुवाच ।। विप्राणां स्थापनार्थाय मयापि भ्रमतो[1] पुरा ।। २२

पृथ्वी सागरपर्यंता दृष्टा सर्वा तदानघ[2] ।।
महीनाम नदी पुण्या सर्वतीर्थमयी शुभा ।। २३

दिव्या मनोरमा सौम्या महापाप प्रणाशिनी ।।
नदी रूपेण तत्रैव पृथ्वी सा नात्र संशयः[3] ।। २४

पृथिव्यां यानि तीर्थानि दृष्टा दृष्टानि नारद ।।
तानि सर्वाणि तत्रैव निवसंति महीजले ।। २५

सा समुद्रेण संप्राप्ता पुण्यतोया महानदी ।।
संजातस्तत्र देवर्षे महीसागर संगमः ।। २६

स्तंभाख्यं तत्र तीर्थं तु त्रिषु लोकेषु विश्रुतम् ।।
तत्र ये मनुजाः स्नानं प्रकुर्वंति विपश्चितः ।। २७

सर्व पाप विनिर्मुक्ता नोपसर्पंति वैयमम् ।।
तत्राद्भुतं हि[5] दृष्टं मे पुरा स्नातुं गतेन वै ।। २८

---

१ अ भ्रमिता
२ अ मया
३ ब संशयं
४ अ ते
५ अ च

तदहं कीर्तयिष्टामि मुने श्रृणु महाद्भुतम् ।।
यावत्स्नातुं व्रजाम्यस्मिन्महीसागर संगमे ।। २९

तीरे स्थितं प्रपश्यामि[1] मुनींद्रं पावकोपमम् ।।
प्रांशुं वृद्धं चास्थिशेषं तपोलक्ष्म्या विभूषितम् ।। ३०

भूजावूर्ध्वौ ततः कृत्वा प्ररुदंतं मुहुर्मुहुः ।।
तं तथा दुःखितं दृष्ट्वा ।।
दुःखितोऽहम था भवम् ।। ३१

सतां लक्षणमेतद्धि यद्दृष्ट्वा दुःखितं जनम् ।।
शत[2] संख्यं तस्य भवेत्तथाहं विललाप हं ।। ३२

अहिंसा सत्यमस्तेयं मानुष्ये सति दुर्लभम् ।।
ततस्तमुपसंगम्य पर्यपृच्छमहं तदा ।। ३३

किमर्थं रोदिषि[3] मुने शोके किं कारणं तव ।।
सुगुह्यमपि चेद्ब्रूहि जिज्ञासा महती हि मे ।। ३४

मुनिस्ततो मामवदद्भृगो निर्भाग्यवान हम् ।।
तेन रोदिमि मा पृच्छ दुर्भाग्यं चालयेद्विकः ।। ३५

---

१ ब प्रपश्यंति
२ ब तत्
३ अ. ब "रोदिसि"

तमहं[1] विस्मयाविष्टः पुनरेवेदमब्रुवम् ।।
दुर्लभं भारते जन्म तत्रापि च मनुष्यता ।। ३६

मनुष्यत्वे ब्राह्मणत्वं मुनित्वं तत्र दुर्लभम् ।।
तत्रापि च तपः सिद्धिः प्राप्यैतत्पंचकंपरम् ।। ३७

किमर्थं रोदिषि मुने विस्मयोऽत्र महान्मम ।।
एवं संपृच्छते मह्यमेतस्मिन्नेव चांतरे ।। ३८

सुभद्रो नाम नाम्ना च मुनिस्तत्राभ्युपाययौ ।।
स हि मेरुं परित्यज्य ज्ञात्वा तीर्थस्य सारताम् ।। ३९

कृताश्रमः पूजयति सदा[2] स्तंभेश्वरं मुनिः ।।
सोऽप्येवं मामिवापृच्छन्मुनिं रोदन कारणम् ।। ४०

अथाहाचम्य स मुनिः श्रूयतां कारणं मुने ।।
अहं हि देवशर्माख्यो मुनिः संयतवाङ्मनाः[3] ।। ४१

निवसामि कृतस्थानो गंगासागरसंगमे ।।
तत्र दर्शे तर्पयामि सदैव च पितॄनहम् ।। ४२

---

१ अ तदहं

२ ब तदा

३ अ ----वाङ्मना ।। (ः) नास्ति ।

वयं सदात्र चायामो देवशर्म स्तवांतिके ।।
स्थानेऽस्माकं कदाचित्वं न चायासिकृतः सुत ।। ४३

श्राद्धांति ते च प्रत्यक्षा ह्यमाशिषो मे वदंति च ।।
ततः कदाचित्पितरः प्रत्दृष्टा मामथाब्रुवन् ।। ४४

स्थानं[2] दिदक्षुस्तश्चाहं न शक्तोऽस्मि निवेदितुम् ।।
ततः परममित्युक्तवा गतवान्पितृभिः सह ।। ४५

पितृणां मंदिरं पुण्यं भौमलोकसमास्थितम् ।।
तत्र[4] तत्र स्थितश्चाहं तेजोमंडल दुर्दशान् ।। ४६

दृष्ट्वाग्रतः पूजयाद्यानपृच्छं स्वान्पितृनिति ।।
के ह्यमी समुपायांति भृशं तृप्ता भृशार्चिताः ।। ४७

पितर ऊचुः[5] भद्रं[6] ते पितरः पुण्याः सभद्रस्य महामुनेः ।।
तर्पितास्तेन मुनिना महीसागरसंगमे ।। ४८

सर्वतीर्थमयी यत्र निलीना ह्युदधौ मही ।।
तत्र दर्शे तर्पयति सुभद्रस्तानमून्सुत ।। ४९

---

१ ब वदं दात्र चादामो अत आरभ्यते ।
२ अ, ब आहस्थानं (आहं) इत्ययं अधिकः पाठः )
३ अ, ब सौमलोक
४ अ अत्र
५ ब पितरऊउ० ।।
६ अ, ब भदे

इत्याकर्ण्यन् वचस्तेषां लज्जितोहं भृशं तदा ।।
विस्मितश्च प्रणम्यैतान्पितृन्स्वं स्थानमागतः ।। ५०

यथा[1] तथा[2] चिंतितं च तत्र यास्याम्यहं स्फुटम् ।।
पुण्यो यत्रापि विख्यातो महीसागर संगमः ।। ५१

कृताश्रमश्च तत्रैव तर्पयिष्ये निजान्पितृन्[3] ।।
दर्शदर्शे यथा चासौ स्तुत्यनामा सुभद्रकः ।। ५२

किं तेन ननु ज्ञातेन कुलांगारेण पापिना ।।
यस्मिञ्जीवत्यपि निजाः पितरोऽन्यस्पृहाकराः ।। ५३

इति संचिंत्य मुदितो रुचिं भार्यामथाब्रुवम् ।।
रुचे त्वया समायुक्तो महीसागर संगमम् ।। ५४

गत्वा स्थास्यामि तत्रैव शीघ्रं त्वं सम्मुखीभव ।।
पतिव्रतासि[4] शुद्धासि कुलीनासि यशस्विनि ।। ५५

रुचि उवाच ।।
हता[5] तस्य[6] जननिनभृत्कथं पाप क्रूं दुरात्मना ।। ५६

श्मसानस्तंभ येनाहं दत्ता व तुभ्यं कृतं त्वया ।।
इह कंदफलाहारैर्यक्त्कि तेन न पूर्यते ।। ५७

---

१ अ यदा ब तथा

२ अ तदा ब तथा

३ अ पितृनद्विजान् ।।

४ ब पितव्रतासि

५ ब इत्ययं अधिकः पाठः (हता) ६ ब तस्या

६

नेतुमिछसि मां तत्र यत्र क्षारोदकं सदा ।।
त्वमेव तत्र संयाहि नंदंतु तव पूर्वजाः ।। ५८

गच्छ वा तिष्ठ वा ~~कल~~ वृद्ध वस[1] वा काकवच्चिरम् ।।
तथा ब्रुवन्त्यां तस्यां तु कर्णाविस्मिपिधाय च ।। ५९

विपुलं शिष्यमादिश्य गृह एकोऽत्र आगतः ।।
सोऽहं स्नात्वात्र संतर्प्य पितृश्छ्रद्धा परायणः ।। ६०

चिंतां सुविपुलां प्राप्तो नरके दुष्कृती यथा ।।
यदि तिष्ठामि चात्रैव अर्धदेहधरो ह्ययहम् ।। ६१

नरो हि गृहिणीहीनो अर्धदेह इति स्मृतः ।।
यथात्मना विना देहे कार्यं किंचिन्न सिध्यति ।। ६२

एवं गृहिण्या हीनो हि न स कर्मसु शस्यते[2] ।।
यो नरः स्त्रीषु देहेषु ~~क~~ अनुरक्तस्त्वसौ पशुः[3] ।। ६३

अनयोर्हि फलं ग्राह्यं सारता नात्र काचन ।।
अर्धदेही च मनुजस्त्व संस्पृश्यः सतां मतः ।। ६४

---

१ अ वास
२ ब कर्म सुरास्यते ।।
३ अ पशु

अथ औत्तानपादिरस्पृश्य उत्तमो हि सुरैःकृतः ॥
अथ चेतत्र संयामि न महीसागरस्ततः ॥ ६५

यामि वा तत्कथं पादौ चलतो मे कथंचन ॥
एतस्मिन्मे मनो विद्धं खिद्यतेऽज्ञान संकटे ॥ ६६

अतोऽहमतिमुह्यामि भूरिं शोचामि रोदिमि ॥
इति श्रुत्वावचैस्तस्य भृशं रोमांच पूरितम् ॥ ६७

साधु साध्वित्य योवाच तं शुभद्रोऽप्यमहं तथा ॥
दण्डवच्च प्रणमितो महीसागर सङ्गमम् ॥ ६८

चिन्तयावश्च मनसि प्रतीकारं मुनेरुभौ ॥
यो हि मानुष्यमासाद्य जलबुद्बुदभंगुरम् ॥ ६९

करार्यय भवत्येष पुरुषोऽन्ये पुरीषकाः ॥
ततः संचिंत्य प्राहेदं सुभद्रोमुनिसत्तमम् ॥ ७०

मा मुने परिखिद्यस्व देवशर्मन्स्थिरो[1] भव ॥
अहं ते नाशयिष्यामि शोकं[2] सूर्यस्तमो यथा ॥ ७१

---

१ ब शिरोभव ॥
२ ब शार्कं

गमिष्याम्याश्रमं त्वं[1] च नात्रापि परिहद्दस्य ते ।।
शृणु तत्कारणं तुभ्यं तर्पयिष्ये पितृनहम् ।। ७२

देवशर्मोवाच ।।
एवं ते वर्द्धमानस्य आयुरस्तु शतं समाः ।।
यद शक्यं महत्कर्म कर्तुमिच्छसि मत्कृते ।। ७३

हर्षस्थाने द्विषादश्रुव पुनर्मां बाधते शृणु ।।
अपि वाक्यं शुभं सन्तो न गृह्णन्ति मुधामुने ।। ७४

कथमेतन्महत्कर्म कारयामि मुधावद ।।
पुनः किंचित्प्रवक्ष्यामि यथा मे निष्कृतिर्भवेत् ।। ७५

शापितोऽसि[2] मया प्राणैर्यथा वच्मि तथा कुरु ।।
अहं सदा करिष्यामि दर्शे चोद्दिश्य ते पितृन् ।। ७६

श्राद्धं गंगार्णावे चात्र मत्पितृणां त्वमाचर ।।
चतुर्भागं प्रदास्यामि एवमेवैतदाचर ।। ७७

सुभद्र उवाच ।।
यद्येवं तव संतोषास्त्वेवमस्तु मुनीश्वर ।।
साधूनां च[3] यथा[4] हर्षस्तथा कार्यं विजानता ।। ७८

---

१ अ स्वं
२ ब शपथान्
३ अ हि
४ ब तथा

भृगुरुवाच ।।

देवशर्मा ततो त्वदष्टो दत्त्वा पुण्यं त्रिवाचिकम् ।।

चतुर्थाश्रि ययौ धाम स्वं सुभद्रोऽपि च स्थितः ।। ७९

एवं विधो नारदाऽसौ महीसागरसंगमः ।।

यमनुस्मरतो मह्यं रोमांचोऽद्यापि वर्तते ।। ८०

नारद उवाच ।।[1]

इति श्रुत्वा फाल्गुनाहं हर्षा गद्गदया गिरा ।।

मृतोमृत इवावोचं साधुर्वांछिति तं भृगुम[2] ।। ८१

यूयं वयं गमिष्यामो महीतीरं[3] सुशोभनम्[4] ।।

आवाम्भीक्षावहे सर्वं स्थानकं तदनुत्तमम् ।। ८२

मम[5] चैवं[6] वचः श्रुत्वा भृगुः सह मह्यायया ।।

समस्तं तु महापुण्यं महीकूलं निरीक्षितम् ।। ८३

तद्दृष्ट्वा चातितुष्टोहमासं रोमांचकंचुकः ।।

अब्रवं मुनि शार्दूलं हर्षगद्गदया गिरा ।। ८४

---

१ ब उ०

२ अ. ब भृगु ।।

३-४ अ पुस्तके "महीसागर संगमं " इतिस्यात् ।

५-६ ब पुस्तके "नारदस्य" इति पाठः

त्वत्प्रसादात्करिष्यामि भृगो स्थानमनुत्तमम् ॥
स्वस्थानं गम्यतां ब्रह्मन्नतः कृत्यं[1] विचिंतये ॥ ८५

एवं भृगुं चास्मि विसर्जयित्वा कल्लोलकोलाहलकौतुकी तटे ॥
अथो पविश्यैदम चिंतयं तदा किं कृत्यात्मान मि वैकयोगी ॥ ८६

२ इति श्री स्कांदे महापुराण एकाशीतिसाहस्त्र्यां संहितायां प्रथमे माहेश्वरे खंडे कौमारिका खंड नारदार्जुन संवादे महीसागर संगम तीर्थ माहात्म्ये तृतीयोऽध्यायः ॥

---

१ अ, क्र कृत्यं
२ अ प्रतौ इत्यर्थं अंतिम पाठः नास्ति ।
ब इति श्री स्कंद पुराणे कुमारिकाखण्डे तृतीयोध्यायः । ३